एका च द्वे च तिसृ(स्रः) च = एकद्वितिस्रः । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावः एका० → एक० । एकद्वितिस्रो मात्रा येषां ते = एकद्वित्रिमात्राः । प्रथमाबहु० जस् → अस् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० ।

**[ह्रस्वदीर्घप्लुताः]** 'ह्रस शब्दे' (५४०) ह्रस् । ह्रस्यते = शब्दाय्यते एकमात्रिकतया इति ह्रस्वः । ' लटि-खटि-खलि-नलि-कण्यशौ०' (उणादि-५०५) वप्र० ।

'दृश् विदारणे' (१५३५) दृ । दृणाति = विदारयति ह्रस्वभावमिति दीर्घः । 'मघा-घङ्घाघ-दीर्घादयः' (उणादि-११०) दीर्घ इति निपातः ।

च्युंङ् - ज्युंङ् - जुंङ् - पुंङ् - 'प्लुंङ् गतौ' (५९८) प्लु । प्लवते मात्राधिकतया इति प्लुतः । 'पुत-पित्त-निमित्तोत - शुक्त-तिक्त०' (उणादि-२०४) कित् तप्र० ।

ह्रस्वश्च दीर्घश्च प्लुतश्च = ह्रस्वदीर्घप्लुताः, प्रथमाबहु० जस्० → अस्० । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) अ० → आ० । 'समानानां०' (१।२।१) आ । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।। छ ।।

**अनवर्णा नामी ।।१।१।६।।**

**[अनवर्णाः]** न विद्यते अवर्णो येषां ते = अनवर्णाः । 'अन् स्वरे' (३।२।१२९) अन् ।

**[नामी]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमनं = नामः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धिः । नामो अस्याऽस्तीति नामी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याव्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।। छ ।।

**लृदन्ताः समानाः ।।१।१।७।।**

**[लृदन्ताः]** लृत् अन्तो येषां ते = लृदन्ताः । प्रथमाबहु० जस् → अस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'समानानां तेन दीर्घः' (१।२।१) आ ।

**[समानाः]** समानं = तुल्यं मानं = परिमाणं येषां ते = समानाः । 'समानस्य धर्मादिषु' (३।२।१४९) सभावः । प्रथमाबहु० जस् । शेषं पूर्ववत् ।। छ ।।

**ए-ऐ-ओ-औ सन्ध्यक्षरम् ।।१।१।८।।**

**[एऐओऔ]** एश्च ऐश्च ओश्च औश्च = एऐओऔ । प्रथमाबहु० जस् । सूत्रत्वाल्लोपः ।

**[सन्ध्यक्षरम्]** 'डुधांग्क् धारणे च' (११३९) धा, संपूर्वकम् । संधानं = संधिः । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आकारलोपः ।

'क्षर संचलने' (९७१) क्षर्, नञ्पूर्वकम् । न क्षरति → न चलति स्वस्वरूपादित्यक्षरम् । 'अच्' (५।१।४९) अच्प्र० → अ । सन्धावक्षरं = सन्ध्यक्षरम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽकारलोपः ।। छ ।।

**अं-अः अनुस्वार-विसर्गौ ।।१।१।९।।**

**[अंअः]** अं च अश्च = अंअः । प्रथमाद्विवचनं औ । सूत्रत्वात् लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org